**अणुसंज्ञोपचार** ( aṇu-sañjñopacāra ) *m.* figurative application of the word atom त्र्यणुकेषु अणुसंज्ञोपचारात् NyāySu.(Ja.) 336B. 12 (*on* ii. 2. 6)

**अणुसदृश** ( aṇu-sadṛśa ) *adj.* similar to an atom अणुसदृशं वस्तूदाहृत्य तन्मानत्वप्रदर्शनम् BrahmSūBh.(S'rī.) ii. 145. 17 (*on* ii. 3. 23)

**अणुसद्भाव** ( aṇu-sadbhāva ) *m.* existence of the atom न प्रलयोऽणुसद्भावात् NyāySū. iv. 2. 16; NyāyVār. 514. 14 (*on* iv. 2. 16)

**अणुसमवस्थान** ( aṇu-samavasthāna ) *n.* particular arrangement (pattern) of atoms अणुसमवस्थानं विषय इति चेत् प्राप्ताप्राप्तसामर्थ्यवचनम् NyāyBh. 105. 15 (*on* ii. 1. 37); अधिकरणमवश्यं वक्तव्यमणुसमवस्थानमधिकरणमिति NyāyVār. 250. 18 (*on* ii. 1. 34)

**अणुसमवायिन्** ( aṇu-samavāyin ) *adj.* inherent in atoms तत्पुनरात्मसमवायि वा स्यात् अणुसमवायि वा BrahmSūBh.(S'aṅ.) 369. 11 (*on* ii. 2. 12); अतः सन्ति केचनाणुसमवायिनो विशेषाः Kāśi. iii. 232. 12 (*on* 5(10). 28)

**अणुसमुदाय** ( aṇu-samudāya ) *m.* aggregate (collection) of atoms अणुसमुदाया एव गोघटादिबोधबोध्याः NyāySu.(Ja.) 389A. 13 (*on* ii. 2. 7)

**अणुसमूह** ( aṇu-samūha ) *m.* collection of atoms अणुसमूहस्तूपलभ्यते NyāyBh. 294. 6 (*on* iv. 2. 13); 103. 16 (*on* ii. 1. 37); NyāyVār. 248. 1 (*on* ii. 1. 34); बाह्यस्याणुसमूहादेर्ग्राह्यस्यासम्भवे क्षणात् S'lokaVār. 5(3). 262 (344. 1)

**अणुसमूहविषय** ( aṇusamūha-viṣaya ) *adj.* pertaining to the collection of atoms तदिदमणुसमूहविषयं ग्रहणमिति NyāyBh. 294. 6 (*on* iv. 2. 13); NyāyVār. 512. 18 (*on* iv. 2. 13)

**अणुसमूहान्तर** ( aṇusamūhāntara ) *n.* another collection of atoms अणुसमूहमुपलभ्याणुसमूहान्तरेऽतिशयं गृह्णतो महत्प्रत्ययो भवति NyāyVār. 248. 2 *on* ii. 1. 34)

**अणुसंपद्** ( aṇu-sampad ) *f.* collection of individual souls अणुसंपदस्त्वमसि नाथ कारणम् HarVi. 6. 88;

**अणुसंबन्धाभाव** ( aṇusambandhābhāva ) *m.* absence of association with atoms अदृष्टस्याणुसंबन्धाभावात् PrakaVi. 498. 13.

**अणुसार** ( aṇu-sāra ) *adj.* having very little substance वाक्यं ममैतदणुसारमपि ग्रहीतुमर्हाः स्थ यूयम् HarVi. 37. 5.

**अणुस्थान** ( aṇu-sthāna ) *n.* narrow place (in a military formation) अणुस्थानेषु विन्यस्ताः कुमाराः सूर्यवर्चसः MahāBhā. vii. 253*(1)

**अणुस्रवण** ( aṇu-sravaṇa ) *n.* thin flow अणुस्रवणभावादामाशयमागम्य … ऊर्ध्वं प्रवर्तते ( दोषसंघातः ) AṣṭāSaṁ. i. 136. 21 (1. 27)

**अणुस्रोतस्** ( aṇu-srotas ) *n.* thin flow ह्रस्वे त्वणुस्रोतसि च क्लेशो बस्तिश्च पूर्ववत् SuśruS. iv. 36. 9.

**अणुस्वरूप** ( aṇu-svarūpa ) *adj.* of atomic form ( गणेशः ) योऽणुभ्योऽणुस्वरूपः GaṇeP. i. 18. 12; ते ह्यणुस्वरूपाः S'rutaPra. iA. 18. 10 (*on* i. 1. 1); अणुस्वरूपस्य जीवात्मनो द्युभ्वाद्यायतनत्वासंभवाच्च VedāntKau. 78. 24 (*on* i. 3. 4); एकेनाणुस्वरूपेणानेकदेहव्याप्त्यसंभवात् VedāntKau. 430. 24 (*on* iv. 4. 5); अस्यार्थः ऋतमणुस्वरूपं सत्यं महद्रूपं परं ब्रह्म S'aṅkaVi.(Ā.) 22. 13.

**अणुस्वरूपत्व** ( aṇusvarūpa-tva ) *n.* the state of being atomic in size अणुस्वरूपत्वेन दहरत्वम् … संगच्छते VedāntKau. 89. 17 (*on* i. 3. 14)

**अणुह** ( aṇuha ) *m.* name of a king अनेना ( v. l. अणुहो ) युवनाश्वश्च … त्रिक्रमी रघुः MahāBhā. i. 1. 172; विभ्राजस्य तु पुत्रोऽभूदणुहो नाम पार्थिवः HariVaṁ. 15. 23; 15. 4; पृथोस्सुकृतिस्ततो विभ्राजः । तस्माच्चाणुहः ViṣṇuP. iv. 19. 43; ( कीर्तिमती ) ब्रह्मदत्तस्य जननी महिषी त्वणुहस्य तु VāyuP. ii. 11. 74; BrahmāṇḍP. ii. 8. 94; LiṅgaP. i. 63. 87; विभ्राजस्य तु दायादस्त्वणुहो नाम पार्थिवः VāyuP. ii. 37. 174; MatsyaP. 49. 56; कन्याम् … व्यासपुत्रः प्रतापवान् । ददौ विभ्राजपुत्राय त्वणुहाय महात्मने DevīBhāP. i. 19. 42; अणुहो नाम वैभ्राजः पञ्चालाधिपतिः पुरा PadmP. v. 10. 98; v. 10. 65.

**अणुहात्मज** ( aṇuhātmaja ) *m.* son of Aṇuha सर्वसत्त्वरुतज्ञश्च राजासीदणुहात्मजः HariVaṁ. 18. 19.

**अणुहेतुक** ( aṇuhetu-ka ) *adj.* caused by atoms, having atoms as cause समुदायः … अणुहेतुकश्च भूतभौतिकसंहतिरूपः BrahmSūBh.(S'aṅ.) 382. 4 (*on* ii. 2. 18); योऽयमणुहेतुकः पृथिव्यादिभूतात्मकः समुदायः BrahmSūBh.(Rā.) 484. 13 (*on* ii. 2. 17); अणुहेतुके पृथिव्यादिसमुदाये … समुदायासिद्धिः VedāntSā.(Rā.) 174. 6 ( *on* ii 2. 17 ); अणुहेतुको भूतभौतिकसंघातः S'rutaPra. ii. 296. 24 (*on* ii. 2. 17)

**अणूक** ( aṇūka ) *n.* [AltGr. I. 191] **1** vertebral column, back-bone यत्र शीर्ष्णोऽवद्यति नांसयोर्नाणूकस्य ĀpaS'S. vii. 25. 6; **2** fourth portion (of a *puruṣa* as a measure) चतुर्भागीयमणूकम् ĀpaS'uS. iv. 11. 5; HirS'S. xxv. 4. 4; ऋष्यणूकं देवताणूकं वा BaudhGS. ii. 1. 28.

**अणूकमात्री** ( aṇūka-mātrī ) *adj.* (*f.*) of the measure of the back-bone मृन्मयीरिष्टकाः करोति … उर्वस्थिमात्र्योऽणूकमात्र्य ऋजुलेखाः ĀpaS'S. xvi. 13. 6; HirS'S. xxv. 4. 3; अणूकमात्र्यो भवन्तीति विज्ञायते ĀpaS'uS. iv. 11. 4.

**अणूकाण्डा** ( aṇū-kāṇḍā ) *adj.* (*f.*) [ AltGr. II. i. 131 ] having a thin stalk तेजनी रराटयैषीकी प्राच्यणूकाण्डा मध्ये विततां तां वंशे निबध्नाति HirS'S. vii. 5. 17.

**अणूकृ** ( aṇū-kṛ- ) VIII. P. to make small, to reduce in size अपानः …। अणूकरोति बाह्यान्तर्मार्गमस्य ततः शकृत् AṣṭāSaṁ. ii. 316. 6 (6. 36)

**अणूत्पादक** ( aṇūtpādaka ) *adj.* producer of atoms सद्धर्मोपगतं नोचेदणूत्पादकमिष्यते । विद्यमानोपलम्भार्थप्रमाणाविषयत्वतः TattvSaṁ. 553.

**अणूदर** ( aṇūdara ) *n.* interior of an atom द्रष्टा तत्रास्य दृश्यश्रीः समुदेत्यप्यणूदरे YogVā. iii. 1. 27.

**अणूदरा** ( aṇūdarā ) *adj.* ( *f.* ) (woman) having a slender belly (i. e waist) अनतिषुदृष्टिमुखैरणूदरा स्यादहंपूर्विकया रसोत्तरम् Raghunā. 12. 20.

**अणूदरी** ( aṇūdarī ) *adj.* (*f.*) (woman) having a slender belly (i. e. waist) बन्दी मुखस्येन्दुरणूदरीणामिन्दीवरश्रीर्नयनांशुबन्दी YātraPra. 1. 13; अम्भोविहारे यदणूदरीणां हारान्विशीर्णानधिसह्यजातम् Raghunā. 1. 36.

**अणूदाहरण** ( aṇūdāharaṇa ) *n.* corroborative instance of an atom न व्यावृत्तस्ततो धर्मः साध्यत्वेनाभिवाञ्छितः । अणूदाहरणादस्माद्वैधर्म्येण प्रकाशितात् TattvSāṁ. 79.

**अणूपम** ( aṇū́pama ) *adj.* [*f.* -ā] comparable to an atom तस्य मध्ये वह्निशिखा … पीता भास्वत्यणूपमा TaiĀ. x. 11. 2 (828. 2); आशागर्तैः प्रतिप्राणि यस्मिन्विश्वमणूपमम् SūktiRa. 175. 19; अन्तरा जलकणैरणूपमैरार्दिते रजसि नीपनिःसृते Acyutarā. 4. 26.

**अणूपरि** ( aṇūpari ) *ind.* on the subtle principles ननु बुद्धिधर्मभूतावैराग्यरूपस्य रागस्य कथमणूपरि संनिवेशः Bhāsk. ii. 238. 15 (*on* iii. 1. 9)

**अणूभाव** ( aṇū-bhāva ) *m.* smallness, littleness काणः … कणतेर्वा स्यादणूभावकर्मणः । कणतिः शब्दाणूभावे भाष्यते । … मात्राणूभावात्कणः । दर्शनाणूभावात्काणः Nir. 6. 30 (128. 4); 9. 19 (164. 18)

**अणूभूय** ( aṇū-bhūya ) *ger.* having become minute or small (हनूमान्) आस्यं प्रविश्य निरगादणूभूयाप्रचेतितः Bhaṭṭi. 8. 24.

**अणूरण** ( aṇūraṇa ) *n.* injury to the vital breaths सा … चकासती … अणूरणैः HarVi. 43. 59. ( comm. अणवः प्राणास्तेषामुरणैर्हिंसाभिः )

**अणेक्कोट्टपुत्तूरु** ( aṇekkoṭṭaputtūru ) *m.* name of a village (in Chingleput Dist.) रम्याणेक्कोट्टपुत्तूरुसीमान्तात्प्राग्दिशि स्थितम् EI. iv. 17. 176.

**अणोपदेश** ( a-ṇopadeśa ) *adj.* (root) not read (in the Dhātupāṭha) with initial cerebral nasal *ṇ* नर्द गर्द शब्दे । … प्रनर्दति अणोपदेशोऽयमिति णत्वं न भवति DhātuPra. I. 55 (10. 15)

**अण्कृत** ( aṇ-kṛta ) *n.* the grammatical operation applied to the suffix *aṇ* कर्मण्यण् … इति केऽप्यण्कृतं प्राप्नोति MahāBh. ii. 42. 10 (*on* iii. 1. 32); अणि कृतानि कार्याणि अण्कृतानि Nyās. ii. 609. 6 (*on* vi. 4. 172); ताच्छीलिकेऽप्यण्कृतं भवति PariVṛ.(Nī.) 36. 3; *adj.* which is caused by the suffix *aṇ* णेऽपि क्वचिदण्कृतं कार्यं भवति KāśiVṛ. *on* P. iv. 1. 15; ताच्छीलिके णेऽप्यण्कृतं कार्यं भवति PariVṛ.(Sī.) 133. 12.

**अण्कृतप्रसङ्ग** ( aṇkṛta-prasaṅga ) *m.* contingency of the grammatical operation applied to the suffix *aṇ* केऽप्यण्कृतप्रसङ्गः Pradī. i. 454B. 32 (*on* i. 1. 56)

**अण्ग्रहण** ( aṇ-grahaṇa ) *n.* **i** mention of the Pratyāhāra *aṇ* यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात् MahāBh. i. 34. 8 (*on* i. 1. 0); अण्ग्रहणानि तु पूर्वेण णकारेण CāndraVṛ. *on* i. 1. 0; KāśiVṛ. *on* P. i. 1. 0; यदण्ग्रहणं तत्पूर्वेण णकारेण प्रत्याहारार्थम् PariVṛ.(Sī.) 2. 22; 1. 12; अत्रत्यमेवाण्ग्रहणं परेण णकारेण Prasā. i. 24. 19; अण्ग्रहणस्य … निवृत्तिपक्षसमाश्रयणेन PāṇiTaVāNaMā. 41. 21; अण्ग्रहणेषु … संदेहवारणाय लण् इति सूत्रेऽन्यानुबन्धे कर्तव्ये PariVṛ.(Nī.) 1. 4; अण्ग्रहणेन यण्सु गुणभेदकत्वं ज्ञाप्यते LaS'abdeS'e. i. 38. 16; i. 41. 2; **ii** mention of the suffix *aṇ* अण्ग्रहणं कृत्वा लेखग्रहणात् ह्रस्वविधावपि न तदन्तविधिः PariVṛ.(Sī.) 55. 20; 104. 22; अण्ग्रहणं नद्यां मतुवो बाधनार्थम् Prasā. i. 760. 2; i. 775. 10.

**अण्ग्रहणसामर्थ्य** ( aṇgrahaṇa-sāmarthya ) *n.* strength of the mention of the Pratyāhāra *aṇ* एवं तर्ह्यण्ग्रहणसामर्थ्यात्पूर्वेण न परेण MahāBh. i. 35. 5 (*on* i. 1. 0); अण्ग्रहणसामर्थ्यादवसीयते पूर्वेणेति PariVṛ.(Sī.) 2. 2; अण्ग्रहणसामर्थ्येनाण्पूर्वेणैव इत्युक्तं भाष्ये LaS'abdeS'e. i. 264. 26.

**अण्ग्रहणाननुवृत्ति** ( aṇgrahaṇānanuvṛtti ) *f.* absence of continuity of taking into account of the Pratyāhāra *aṇ* in the following rules इदं च विध्यर्थमेव अण्ग्रहणा( ? न )नुवृत्तेः LaS'abdeS'e. i. 41. 15.

**अण्ग्रहणानर्थक्य** ( aṇgrahaṇānarthakya ) *n.* purposelessness of the